दिनाङ्क: 14.06.2026

प्रात: - 06:55

## पीएम- नीसयात्रा

प्रधानमन्त्री नरेन्द्रमोदी फ्रान्सदेशस्य नीस-नगरम् संप्राप्तवान् , भारतीयप्रवासीजनैः तस्य हार्दिकं स्वागतं कृतम्। भारतस्य प्रधानमन्त्री नरेन्द्रमोदी महोदयः रात्रौ फ्रान्स - स्लोवाकियादेशयोः यात्रायाः प्रथम चरणे नीस-नगरम् संप्राप्तवान् । तत्र फ्रान्सदेशस्य वरिष्ठाधिकारिभिः तस्य हार्दिकं स्वागतं कृतम्। तत्र होटल-नेग्रेस्को-स्थले भारतीयप्रवासि जनैः तेषां हार्दिकं स्वागतं कृतम्। प्रधानमन्त्री स्वीययात्राकाले फ्रान्स-राष्ट्रपतिना सह द्विपक्षीयवार्तां करिष्यति तथा विविधेषु कार्यक्रमेषु सहभागित्वं वहिष्यति।

फ्रान्सदेशस्य नीस-नगरे प्रधानमन्त्रिण: नरेन्द्रमोदिनः भारतीयप्रवासीजनैः भव्यं स्वागतं कृतम्। तत्र फ्रान्स-इटली-कलाकारैः प्रस्तुतानि कथक-भरतनाट्यादीनि, भारतीय-शास्त्रीय-नृत्यानि अपि दृष्टानि। अद्य प्रधानमन्त्री मोदी फ्रान्स-राष्ट्रपतिना इमैनुएल-मैक्रों महोदयेन सह 'भारत-इनोवेट्स' कार्यक्रमस्य शुभारम्भं करिष्यति तथा च प्रौद्योगिकी-रक्षा-रणनीतिकसहयोगविषयेषु द्विपक्षीयवार्तां करिष्यति।

## प्रधानमन्त्री/ स्वागतम्

नीस-नगरे भारतीयप्रवासि जनानां स्नेहपूर्णस्वागताय प्रधानमन्त्री नरेन्द्रमोदी तेषां धन्यवादम् अकरोत्। फ्रान्सदेशस्य नीस-नगरे प्राप्तस्य हार्दिकस्वागतस्य कृते प्रधानमन्त्री नरेन्द्रमोदी भारतीयप्रवासिजनेभ्यः धन्यवादम् अकरोत्। सामाजिक-अन्तर्जाल-माध्यमेन प्रकाशिते सन्देशे

तेन उक्तम् यत् एतत् स्वागतं स्मरणीयम्। सः अवदत् यत् स्वदेशात् दूरस्थित: अपि भारतीयप्रवासिनः जनाः भारतेन सह स्वीयं दृढं सम्बन्धं निरन्तरं धारयन्ति।

## प्रधानमंत्री- स्लोवाकिया-यात्रा

प्रधानमन्त्रिणः नरेन्द्रमोदिनः स्लोवाकिया-यात्रा भारत-स्लोवाकिया-सम्बन्धान् सुदृढीकरिष्यति। स्लोवाकियादेशे भारतस्य राजदूतः अपूर्वचन्द्रः उक्तवान् यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः स्लोवाकिया-यात्रा उभयोः देशयोः सहयोगस्य नूतनान् मार्गान् उद्घाटयिष्यति। ब्रातिस्लावा-नगरे आकाशवाण्या: वार्ताहरेण सह वार्तालापे असौ अवदत् यत् एषा यात्रा विशेषतः आर्थिक-व्यापारिक-सम्बन्धानां सुदृढीकरणे महत्त्वपूर्णां भूमिकां निर्वहिष्यति।

## इसरो -चन्द्र अवतरणं

भारतीय-अन्तरिक्ष-अनुसन्धान-संस्थायाः अध्यक्षः डॉ. वी. नारायणनः सूचितवान् यत् इसरो तथा परमाणु-ऊर्जा-विभागः चन्द्र-अवतरण-यानस्य विकासार्थं संयुक्तरूपेण कार्यं कुरुतः।

भारतीय-अन्तरिक्ष-अनुसन्धान-संस्थायाः अध्यक्षः डॉ. वी. नारायणनः अवदत् यत् इसरो परमाणु-ऊर्जा-विभागेन सह मिलित्वा अत्यन्तशीतलपरिस्थितेः संरक्षणार्थं उन्नत-कृत्रिम-तापन-प्रणालीं च विकसितुं कार्यं कुरुतः । बेंगलूरुनगरे आयोजिते सीएसआईआर-आर आइ एस् ई -सम्मेलने सः उक्तवान् यत् सौरऊर्जया सञ्चालितं चन्द्रयान-त्रयस्य लैण्डर विक्रम-अवतरणयानं चन्द्रे केवलं चतुर्दश-दिनानि यावत् कार्यम् अकरोत् । कार्यक्षमं अवतरणयानं निर्मातुं प्रयासान् करिष्यतः येन इदानीं द्विशत-दिनपर्यन्तं चन्द्रे कार्यं भवेत् । कृत्रिम-तापन-प्रणाल्या युक्तम् एतद् यानं चन्द्रस्य कठोर-जलवायुपरिस्थितिषु अपि कार्यं करिष्यति तथा च भविष्ये दीर्घकालिक-चन्द्र-अन्वेषण-अभियानेषु सहायकं भविष्यति।

सञ्चारः/ ड्रोन

केन्द्रीय-सञ्चारमन्त्री ज्योतिरादित्यसिन्धिया हिमाचलप्रदेशे डाकविभागस्य ड्रोन-आधारित-डाक-परिवहन-सेवायाः शुभारम्भम् अकरोत्। एषा सेवा मण्डी-प्रधान-डाककार्यालयात् रेहरधार-शाखा-डाककार्यालयपर्यन्तं प्रवृत्ता । दुर्गमेषु दूरस्थेषु च क्षेत्रेषु शीघ्रतरां कार्यक्षमां च सम्पर्कव्यवस्थां प्रदातुमस्याः सेवायाः आरम्भः कृतः। सञ्चारमन्त्रालयस्य अनुसारेण आगामिषु द्वित्रमासेषु हिमाचलप्रदेशे असमे च प्रायः शतपञ्चाशत् मार्गेषु ड्रोन-आधारित-डाक-परिवहन-सेवायाः विस्तारयितुं योजना अस्ति।

अमेरिका- राष्ट्रपतिः

अमेरिकादेशस्य राष्ट्रपतिः डोनाल्ड ट्रम्पः उक्तवान् यत् ईरानदेशेन सह युद्धसमापनसम्बद्धस्य संधिपत्रे अद्य हस्ताक्षरं सम्भाव्यते। तेन उक्तं यत् अस्य सन्धेः लक्ष्यं ईरानम् परमाण्वस्त्रेभ्यः दूरीकरणम् अस्ति । परन्तु ईरानस्य विदेशमन्त्रालयस्य प्रवक्ता इस्माइल बघाई उक्तवान् यत् संधिषु हस्ताक्षरं तत्कालं न भवितुमर्हति , अपितु आगामिदिनेषु भवेत्

क्रिकेट

एकदिवसीय-पुरुष-क्रिकेट-शृङ्खलायाः प्रथम- स्पर्धायां भारतेन अफगानिस्तानदलम् पराजितम्। हिमाचलप्रदेशस्य धर्मशालानगरे प्रथम-एकदिवसीय-क्रिकेट-स्पर्धायां भारतेन अफगानिस्तानदलम् सप्तक्रीडकैः पराजितम्। -चतुरधिक-नवति-उत्तर एकशतं धावनाङ्कानां लक्ष्यं भारतदलम् सार्धद्वाविंशत्यधिक कन्दुक प्रक्षेप चक्रेषु प्राप्तवान्। कप्तानः शुभमन-गिलः चतुरशीतिधावनाङ्कानि कृत्वा अपराजितः अभवत् तथा च क्रीडापुरुषः घोषितः।